
# पञ्चदश: पाठ: । मनोराज्यस्य फलम् ।

पुरा अमरशक्ति: नाम राजा आसीत्। तस्य पुत्रा: विवेकरहिता: शास्त्रविमुखाश्च। मनोरञ्जक-कथामाध्यमेन विष्णुशर्मा नाम पण्डित: तान् नीतिशास्त्रपारङ्गतान् अकरोत्। तदर्थं रचितानां कथानां सङ्ग्रह: एव 'पञ्चतन्त्रम्' इति नाम्ना विख्यात:। (१) मित्रभेद: (२) मित्रसम्प्राप्ति: (३) काकोलूकीयम् (४) लब्धप्रणाश: (५) अपरीक्षितकारकम् इति तानि पञ्च तन्त्राणि। अपरीक्षितकारकात् स्वीकृता प्रस्तुतकथा।

अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च।
न पराभवमाप्नोति शक्रादपि कदाचन॥


- दिवास्वप्न: नाम किम्?
- 'यथा चिन्तितं तथैव अभवत्' इति कदाचित् अनुभूतं वा ?



कस्मिंश्चित् नगरे कश्चित् स्वभावकृपणो नाम कोऽपि भिक्षुक: प्रतिवसति स्म। तेन भिक्षया प्राप्तेन सक्तुपिष्टेन कलश: सम्पूरित:। तं च घटं नागदन्ते रज्ज्वा बद्ध्वा तस्याधस्तात् कटं प्रसार्य सततं तद्विषये चिन्तयन् स: सुप्त:। स: अचिन्तयत् - "यत्परिपूर्णोऽयं घटस्तावत् सक्तुपिष्टेन वर्तते। यदि दुर्भिक्षं भवति तर्हि अस्य विक्रयणेन रूप्यकाणां शतं **प्राप्स्यामि**। ततस्तेन अहम् अजाद्वयं **क्रेष्यामि**। तत: षाण्मासिक-प्रसववशात् ताभ्यां यूथ: **भविष्यति**। ततोऽजाभि: प्रभूता: धेनू: **ग्रहीष्यामि**, धेनुभि: महिषी:, महिषीभि: वडवा:, वडवाप्रसवत: प्रभूता: अश्वा: **भविष्यन्ति**। तेषां विक्रयणात्प्रभूतं सुवर्णं **प्राप्स्यामि**। सुवर्णेन चतु:शालं गृहं **सम्पत्स्यते**। तत: कश्चित् धनिक: प्राप्तवयस्कां रूपाढ्यां कन्यां मह्यं **दास्यति**। आवयो: पुत्र: **भविष्यति**। तस्याहं सोमशर्मेति नाम **करिष्यामि**। तत: स: जानुचलनयोग्य: **भविष्यति**। एकदा सोमशर्मा मां दृष्ट्वा मत्समीपम् **आगमिष्यति**। ततोऽहं कोपाविष्ट: **अभिधास्यामि** भार्याम्, "गृहाण बालकम्" इति। साऽपि मम वचनं न **श्रोष्यति**। तावत्काले कश्चन कुक्कुर: तत्र **आगमिष्यति**। सोमशर्मा तस्मात् भीत: **भविष्यति**। ततोऽहं समुत्थाय लगुडेन तं कुक्कुरं **ताडयिष्यामि**।" एवं स्वप्नमग्न: ध्यानस्थित: स: तथैव लगुडप्रहारम् अकरोत्। तेन लगुडप्रहारेण सक्तुपिष्टेन पूर्ण: स: घट: भग्न: अभवत्। स्वभावकृपण: स: पाण्डुरताम् अगच्छत्। अत: ब्रवीमि -

अनागतवतीं चिन्तामसम्भाव्यां करोति य:।
स एव पाण्डुर: शेते सोमशर्मपिता यथा॥

**भाषाभ्यास:**

### १. एकवाक्येन उत्तरत।

१. भिक्षुकस्य नाम किम्?
२. स्वभावकृपणेन घट: कुत्र बद्ध:?
३. सोमशर्मा कस्मात् भीत: भविष्यति?
४. सक्तुपिष्टेन पूर्ण: घट: कस्मात् कारणात् भग्न: ?
५. सोमशर्मपितु: नाम किम्?
६. स्वभावकृपणेन कट: कुत्र प्रसारित: ?

**२. माध्यमभाषया उत्तरत।**

१. स्वभावकृपणः किमर्थं पाण्डुरताम् अगच्छत्?

२. 'अपि दिवास्वप्नदर्शनं योग्यम्?' इति कथायाः आधारेण लिखत।

**३. प्रश्ननिर्माणं कुरुत।**

१. स्वभावकृपणः अजाद्वयं क्रेष्यति।     २. अयं घटः सक्तुपिष्टेन पूर्णः।

**४. (अ) सन्धिविग्रहं कुरुत।** १) तस्याधस्तात् (२) सोमशर्मेति (३) ततोऽहम्।

**(आ) वर्णविग्रहं कुरुत।** (१) दुर्भिक्षम् (२) रूपाढ्याम् (३) ध्यानस्थितः (४) स्वभावकृपणः

**(इ) सूचनानुसारं वाक्यपरिवर्तनं कुरुत।**

१. कश्चित् धनिकः स्वकन्यां मह्यं दास्यति। (लट्लकारे परिवर्तयत।)

२. बालकस्य सोमशर्मा इति नाम करिष्यामि। (कर्तृपदस्थाने 'सः' योजयत।)

३. सोमशर्मा मम समीपम् आगमिष्यति। ('मम' स्थाने 'पितृ'शब्दस्य योग्य रूपं लिखत।)

४. एकः मनुष्यः प्रतिवसति स्म। (स्म निष्कासयत)

५. अहं लगुडेन कुक्कुरं ताडयिष्यामि। (लृट्स्थाने लिङ्प्रयोगं कुरुत)

**५. समानार्थकशब्दं लिखत।** कृपणः, दुर्भिक्षम्, अश्वः, धेनुः, सुवर्णम्, कुक्कुरः।

**६. समस्तपदं कुरुत।** स्वभावेन कृपणः, कोपेन आविष्टः, लगुडस्य प्रहारः।

**पठत अवगच्छत !**

**व्यञ्जनानां विस्तारः।**

१) भयात् + मुक्तः – भयान्मुक्तः।
मृत् + मयूरः – मृन्मयूरः।

वर्गीयव्यञ्जनम् + अनुनासिकम् = वर्गीय–अनुनासिकम्

षट् + मासः = षण्मासः।
वाक् + मयम् – वाङ्मयम्।

२) तस्मात् + च = तस्माच्च।
विद्वत् + जनः =विद्वज्जनः।

तु + चु = चु

(चु = च वर्गः) (तु = त वर्गः)

अवकारात् + च = अवकराच्च।
एतत् + जयः = एतज्जयः।

३) मत् + शरः = मच्छरः।
श्रीमत् + शङ्करः = श्रीमच्छङ्करः।

त् + श् =
↓ ↓
च् छ्

तत् + श्रोतुम् = तच्छ्रोतुम्।
गच्छेत् + शिवः = गच्छेच्छिवः।

४) तस्मिन् + एव = तस्मिन्नेव।
इन् + अन्त = इन्नन्त।

ह्रस्वः स्वरः (पूर्वम्)   न्   कोऽपि स्वरः (पश्चात्) = न्न

तस्मिन् + उत्सवे = तस्मिन्नुत्सवे।
कुर्वन् + आसीत् = कुर्वन्नासीत्।

५) सत् + आचारः = सदाचारः।
शरात् + अपि = शरादपि।

वर्गीयव्यञ्जनम् + स्वरः/मृदुव्यञ्जनम्=तृतीयव्यञ्जनम्

षट् + विकाराः = षड्विकाराः।
तस्मात् + एव = तस्मादेव।

६) तद् + कृते = तत्कृते। क्षुध् + पीडा = क्षुत्पीडा

वर्गीयव्यञ्जनम् + कठोरव्यञ्जनम् = प्रथमव्यञ्जनम्

षड् + कारः = षट्कारः।
मृद् + साधितम् = मृत्साधितम्।

# रम्यसंस्कृतम्। विशेषण-विस्तार:।

**धवल: चन्द्र:** आकाशे वर्तते। अहं प्रतिदिनं **धवलं चन्द्रं** पश्यामि, तुष्यामि च। **धवलेन चन्द्रेण** नभ: विभाति। चकोरा: **धवलाय चन्द्राय** स्पृहयन्ति। **धवलात् चन्द्रात्** किरणा: स्रवन्ति। पूर्णिमायां **धवलस्य चन्द्रस्य** सौन्दर्यम् अपूर्वं खलु। हे **धवल चन्द्र**, शीतलतां प्रयच्छ सर्वेभ्य:।

**यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।**
**तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि॥**

संस्कृतभाषायां यथा विशेष्यस्य लिङ्गं, वचनं विभक्तय: च परिवर्तन्ते तथैव विशेषणे अपि परिवर्तनं भवति।

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् | विभक्ति: |
|---|---|---|---|
| निपुण: बालक: | निपुणा बालिका | निबिडम् अरण्यम् | प्रथमा |
| निपुणं बालकम् | निपुणां बालिकाम् | निबिडम् अरण्यम् | द्वितीया |
| निपुणेन बालकेन | निपुणया बालिकया | निबिडेन अरण्येन | तृतीया |
| निपुणाय बालकाय | निपुणायै बालिकायै | निबिडाय अरण्याय | चतुर्थी |
| निपुणात् बालकात् | निपुणाया: बालिकाया: | निबिडात् अरण्यात् | पञ्चमी |
| निपुणस्य बालकस्य | निपुणाया: बालिकाया: | निबिडस्य अरण्यस्य | षष्ठी |
| निपुणे बालके | निपुणायां बालिकायाम् | निबिडे अरण्ये | सप्तमी |
| हे निपुण बालक | हे निपुणे बालिके | हे निबिड अरण्य | सम्बोधनम् |

एवमेव द्विवचनस्य तथा बहुवचनस्य रूपाणि भवन्ति।

**कुशल: वैमानिक:।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| कुशल: वैमानिक: | कुशलौ ________ | ________ वैमानिका: | प्रथमा |
| ________ वैमानिकम् | ________ वैमानिकौ | कुशलान् ________ | द्वितीया |
| कुशलेन ________ | कुशलाभ्यां ________ | ________वैमानिकै: | तृतीया |
| ________ वैमानिकाय | ________ वैमानिकाभ्यां | कुशलेभ्य: ________ | चतुर्थी |
| कुशलात् ________ | कुशलाभ्यां ________ | ________ वैमानिकेभ्य: | पञ्चमी |
| ________ वैमानिकस्य | ________ वैमानिकयो: | कुशलानां ________ | षष्ठी |
| कुशले ________ | ________ वैमानिकयो: | ________ वैमानिकेषु | सप्तमी |
| कुशल ________ | ________ वैमानिकौ | कुशला: ________ | सम्बोधनम् |

एवमेव 'चतुर: बालक:', 'उत्तम: कवि:', 'निबिडं वनम्', 'दीर्घा नदी', 'मेधाविनी बालिका', 'पुरातनी कथा', 'प्रिय: सुहृद्', 'स्नेहालु: पिता', 'रम्या उषा:' इत्येषां विशेषण-विशेष्य-युग्मानां रूपाणि वदन्तु।

## जिज्ञासापत्रम्



### विशेषण–विशेष्ययोः युग्मं पूरयत।

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् | विभक्तिः |
|---|---|---|---|
| पवित्रः जलाशयः | (पवित्र) नदी | (पवित्र) गङ्गाजलम् | प्रथमा |
| (नूतन) मण्डपम् | नूतनां भाषाम् | (नूतन) मन्दिरम् | द्वितीया |
| समृद्धेन (कोष) | (समृद्ध) परम्परया | समृद्धेन (नगर) | तृतीया |
| (कोमल) स्वभावाय | कोमलायै (लता) | (कोमल) पुष्पाय | चतुर्थी |
| पराधीनात् (उपाय) | (पराधीना) बुद्ध्याः | (पराधीन) जीवनात् | पञ्चमी |
| (उत्तम) पुरुषस्य | उत्तमायाः (पत्रिका) | उत्तमस्य (वृत्तपत्र) | षष्ठी |
| (स्थूल) पुत्रे | स्थूलायाम् (कन्या) | (स्थूल) पात्रे | सप्तमी |
| हे (श्रेष्ठ) ऋषे | हे श्रेष्ठे (तपस्विनी) | हे (श्रेष्ठ) औषध | सम्बोधनम् |

### वाक्यानि पूरयत।

१. (विशाल) वृक्षस्य अधः पक्वानि (फलम्) अपतन्। २. (वृद्ध) पितामह्यै (सरसा) कथाः रोचन्ते।
३. निपुणया (गायिका) सह अहं (श्रवणीय) गीतं गायामि। ४. मृण्मये (पात्रम्) (शीतल) जलं विद्यते।

### पठत बोधत।

- चित्, चन युतानि विशेषणानि =

चित्, चन एतद् प्रत्ययद्वयम् अनिश्चिततां दर्शयति। 'किम्' इत्यनेन सह तयोः उपयोगः भवति।
(कः + चित्) कश्चित् नृपः, (किम् + चन) किञ्चन नगरम्।
(केन + चित्) केनचित् मुनिना। (कस्य + चित्) कस्यचित् मनुजस्य।

अस्ति **कश्चित्** नृपः। सः **कस्मिंश्चित्** नगरे अटति स्म। **केनचित्** मुनिना सः आहूतः। मुनिः अपृच्छत्, "किम् अन्विष्यसि महाराज?" नृपः **कश्चित्** कालं विचिन्त्य अवदत्, "न किमपि। मम कङ्कणं हस्तात् परिभ्रष्टम्। तद् एव अन्विष्यामि।" ऋषिः उक्तवान्, "हे राजन्, भवान् तु नृपः। अन्यत् किमपि कङ्कणं धारयितुं शक्नोषि। तथापि कङ्कणविषये किमर्थम् एतावत् चिन्तनम्? प्रत्युत भवतः राज्ये कियन्तः जनाः बुभुक्षिताः, **केचन** दरिद्राः **केचित्** रोगपीडिताः च। **काश्चन** महिलाः उद्योगेन विना निराधाराः। **कैश्चिद्** बालकैः शिक्षणं त्यक्तम्। **केषाञ्चन** शिशूनाम् अन्नादिविषये महती दुरवस्था। **केषुचन** विभागेषु जलव्यवस्था न समीचीना। एतेषां कृते **किमपि** कुरु। कङ्कणविषये चिन्तां मा कुरु। राज्यस्य व्यवस्था नृपस्य परं कर्तव्यम्।"

### पठत अवगच्छत ! व्यञ्जनानां विस्तारः।

७) निसर्गात् + लभ्यते = निसर्गाल्लभ्यते।
एतद् + लवणम् = एतल्लवणम्।

त्/द् + ल् → ल्

उत् + लसति = उल्लसति।
कदाचित् + लब्धम् = कदाचिल्लब्धम्।

८) अस्मिन् + लोके = अस्मिँल्लोके।
ग्रन्थान् + लिखति = ग्रन्थाँल्लिखति।

न् + ल् → ँल्

तान् + लोकान् = ताँल्लोकान्।
देवान् + लसति = देवाँल्लसति।